# संस्कृत वार्ताः

**दिनाङ्क : 06.10.2026** **सायम् - 06:20**

**आदौ मुख्यवार्ताः**

- रक्षामन्त्रिणा राजनाथसिंहेन अद्य विशाखापत्तनम नगरे हिन्दुस्तान शिपयार्ड् लिमिटेड् इत्यत्र फ्लीट सपोर्ट शिप-1 इति नौव्यूह-सहायक-पोतः समुद्घाटितः अथ फ्लीट सपोर्ट शिप-5 इति पोतस्य च अधारशिला स्थापिता ।
- तमिलनाडु-पुडुचेरी-पश्चिमबङ्गालानां पञ्चविधानसभासनेभ्यः अथ असमस्य एकस्य लोकसभासनस्य च कृते जाते उपनिर्वाचने मतदानं प्रवर्तते।
- भारतस्य राष्ट्रिय-दूरचिकित्सा-सेवया ई-सञ्जीवनी इत्यनया पञ्चाशत्-कोटितः अधिक-दूरपरामर्शाणां महत्त्वपूर्णं सीमाचिह्नम् अवाप्तम्।
- विश्व-वित्तकोषेण वर्तमान-वित्तवर्षाय भारतस्य जीडीपी इत्यस्य वृद्ध्यनुपातस्य पूर्वानुमानं पूर्व-निर्धारितात् षड्-दशांश-षड्प्रतिशतात् संवर्ध्य सप्त-दशांशैकप्रतिशन्मितं कृतम्।
- पुरुष-क्रिकेट्-क्रीडायां भारत-वेस्टइण्डीज-दलयोः मध्ये विंशति-प्रति विंशति-अन्ताराष्ट्रिय-प्रतिस्पर्धायाः प्रथमं द्वन्द्वम् अद्य लखनऊ-नगरे सम्पत्स्यते।

**अथ वार्ताः विस्तरेण**

**मन्त्रिमण्डलस्य निर्णयः**

केन्द्रीयमन्त्रिमण्डलेन एकीकृत-परिवहन-आपूर्ति-व्यवस्थापन-प्राधिकरणस्य स्थापनायै अनुमोदनं प्रदत्तम्। अद्य नवदिल्ल्यां केन्द्रीयमन्त्रिमण्डलस्य उपवेशनानन्तरं वार्ताहरान् सम्बोधयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः उक्तवान् यत् अनेन परिवहन-आपूर्तिव्यवस्थापनक्षेत्रे अनुसन्धानं, योजनानिर्माणं, मूल्याङ्कनं, निरीक्षणं तथा प्रभावमूल्याङ्कनं च सुदृढं भविष्यति। सः उक्तवान् यत् इदं देशे एकीकृत-परिवहन-आपूर्तिव्यवस्थापन-योजनायै शीर्षसंस्थारूपेण कार्यं करिष्यति।

श्रीवैष्णवः उक्तवान् यत् देशस्य जीडीपी इति प्रायः सप्ततः अष्टप्रतिशतं यावत् वर्धयति, अतः आपूर्तिव्यवस्थापनस्य आवश्यकता अपि निरन्तरं वर्धते। अस्याः वर्धमानायाः आवश्यकतायाः पूर्त्यै देशस्य विभिन्नेषु भागेषु बहवः राजमार्गाः, रेलमार्गाः, जलमार्गाः अथ विमानपत्तनानि च विकसितानि भवन्ति। एकीकृत-परिवहन-आपूर्तिव्यवस्थापन-प्राधिकरणं दशवर्षीय-योजनावधिम् आधृत्य दीर्घकालिकं राष्ट्रिय-परिवहन-महायोजनापत्रं सज्जीकरिष्यति।

केन्द्रीयमन्त्रिमण्डलेन लघु-मध्यमोद्यमेषु स्वामित्वनिवेशाय दशसहस्रकोटिरूप्यकाणां लघु-मध्यमोद्यम-विकासनिधेः स्थापनायै अपि अनुमोदनं प्रदत्तम्। श्रीवैष्णवः उक्तवान् यत् अयं निधिः उच्चविकासक्षमतायुक्तेभ्यः, व्यावसायिकसामर्थ्यं विस्तारक्षमतां च प्रदर्शितवद्भ्यः लघु-मध्यमोद्यमेभ्यः दीर्घकालिकं स्वामित्वनिवेशधनं प्रदास्यति। मन्त्रिणा उक्तं यत् निधेः अधिकांशभागः विनिर्माणक्षेत्रे केन्द्रितेभ्यः लघु-मध्यमोद्यमेभ्यः प्रदास्यते। सेवाक्षेत्रे, प्राविधिकक्षेत्रे, नवोन्मेषाधारितेषु क्षेत्रेषु तथा रणनीतिक-मूल्यशृङ्खलायां च कार्यं कुर्वद्भ्यः उद्यमेभ्यः अपि अयं निधिः साहाय्यं प्रदास्यति।

**राजनाथ-विशाखापत्तनम्**

रक्षामन्त्रिणा राजनाथसिंहेन अद्य विशाखापत्तनम नगरे हिन्दुस्तान शिपयार्ड् लिमिटेड् इत्यत्र फ्लीट सपोर्ट शिप-1 इति नौव्यूह-सहायक-पोतः समुद्घाटितः अथ फ्लीट सपोर्ट शिप-5 इति पोतस्य च अधारशिला स्थापिता । अनेनैव सह तेन उन्नतीकृतः चतुर्थः पोत-निर्माण-मार्गः अथ त्रिशत-टन-भार-वहन-क्षमं गोलियाथ्-उत्थापक-यन्त्रं राष्ट्राय समर्पितम्। उपस्थितां जनसभां सम्बोधयन् श्रीसिंहेन प्रतिपादितं यत् देशस्य सामुद्रिक-शक्तेः संवर्धनाय अथ च रक्षा-सामर्थ्यस्य दृढीकरणाय भारतस्य कृते सुदृढस्य एकीकृतस्य च सामुद्रिक-पारिस्थितिकी-तन्त्रस्य महती आवश्यकता वर्तते।

रक्षामन्त्रिणा उक्तं यत् सूर्यः इति नामाङ्कितः अयं प्रथमः नौव्यूह-सहायक-पोतः भारतीय-नौसेनायाः व्याप्तिं, दीर्घ-स्थायित्वं अथ च सञ्चालन-प्रभावशीलतां नूतनामुन्नतिं नेष्यति।

**उपनिर्वाचनम्**

तमिलनाडु-पुडुचेरी-पश्चिमबङ्गालानां पञ्चविधानसभासनेभ्यः अथ असमस्य एकस्य लोकसभासनस्य च कृते जाते उपनिर्वाचने मतदानं प्रवर्तते। तमिलनाडुराज्ये मदुरान्तकम-धारापुरम चेत्येतयोः, पुडुचेर्यां थट्टनचावडी इत्यत्र, पश्चिमबङ्गालराज्ये च रेजीनगर-नन्दीग्रामयोः मतदानं प्रचलति। असमस्य एकमेव लोकसभासनाय नगाँव-नगरे मतदानं प्रवर्तते। मतगणना शुक्रवासरे भविष्यति।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् आकाशवाणीतः प्रसार्यते।**

**प्रोमो - सोशल मीडिया**

**उपराष्ट्रपति- संस्कृत-विश्वविद्यालयस्य**

नवदिल्ल्याः श्री लाल् बहादुर् शास्त्री राष्ट्रीय-संस्कृत-विश्वविद्यालयस्य द्वितीय-दीक्षान्त-समारोहे भाषमाण: भारतस्य उपराष्ट्रपतिः श्री. सी.पी.राधाकृष्णन्-वर्यः संस्कृतं भारतस्य भाषिक-सांस्कृतिक-एकतायाः सुवर्णद्वारम् इति वर्णितवान्। प्रायः सप्तनवत्यधिक-चतुःशतोत्तरैकसहस्रं यावत् छात्राः उपाधिं प्राप्तवन्तः, मेधाविनः छात्राः च स्वर्णपदकं प्राप्तवन्तः। सः संस्कृतं तथा भारतीयज्ञानपरम्पराम् आधुनिक-तन्त्रज्ञानेन सह योजयितुं प्रार्थितवान्। शिक्षा राज्यमन्त्रिणा सुकान्त मजूमदारेणापि संस्कृतेन सह आधुनिक तन्त्रज्ञानार्जिताय आह्वानं कृतम्। विश्वविद्यालयस्य उपलब्धीनां विषये प्रवदन् , कुलपतिः प्रो. मुरली मनोहर पाठकः भारतीयज्ञानपरम्परां आधुनिक-सन्दर्भेण सह योजयितुं प्रतिबद्धतां प्रकटितवान्।

**विपक्षस्य विरोधप्रदर्शनम्**

अद्य विशेषगहन-पुनरीक्षण-प्रक्रियायां कथिता-नियमिततानां तथा मुख्यनिर्वाचनायुक्तस्य ज्ञानेशकुमारस्य पदच्युतेः च याचनां कृत्वा विपक्षदलैः संसद्भवनात् राष्ट्रराजधानीस्थितस्य भारतनिर्वाचनायोगस्य मुख्यालयं निर्वाचनसदनं प्रति विरोधप्रदर्शनयात्रा आयोजिता।

निर्वाचनायोगं प्रति गच्छन् तेषां समूहः सुरक्षाकर्मचारिभिः आकाशवाणीभवनस्य समीपे एव निरुद्धः। अनन्तरं लोकसभायां विपक्षनेता काङ्ग्रेस्-सांसदश्च राहुलगान्धी अन्यैः दलनेतृभिः समर्थकैश्च सह आकाशवाणीभवनं प्रविष्टवान्। ततः पूर्वं काङ्ग्रेस्-दलाध्यक्षः राज्यसभायां विपक्षनेता च मल्लिकार्जुनखड्गे, राहुलगान्धी तथा अन्यदलानां विपक्षिसांसदाः संसद्मार्गे विरोधप्रदर्शनं कृतवन्तः। एतदन्तरे भाजपेति दलेन एस्.आइ.आर्. इति प्रक्रियायाः विरोधं तथा आकाशवाणीभवने राहुलगान्धिनः अनधिकृतप्रवेशं च आधृत्य काङ्ग्रेस्-नेतुः आलोचना कृता।

## ई-सञ्जीवनी

भारतस्य राष्ट्रिय-दूरचिकित्सा-सेवया ई-सञ्जीवनी इत्यनया पञ्चाशत्-कोटितः अधिक-दूरपरामर्शाणां महत्त्वपूर्णं सीमाचिह्नम् अवाप्तम्। अनया उपलब्धया देशव्यापि-नागरिकेभ्यः गुणवत्तापूर्ण-स्वास्थ्य-सुविधाः सुलभतया, मितव्ययेन अथ च समदृष्ट्या प्रापयितुं सर्वकारस्य अङ्कीय-प्रविधेः उपयोग-प्रयासः सफलताङ्गतः । अनेन देशस्य षट्त्रिंशत्सु राज्येषु केन्द्रशासित-प्रदेशेषु च सम्मिलित-रूपेण पञ्चाशत्-कोटितः अधिक-परामर्शाः पञ्जीकृताः। केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्रालयेन उक्तं यत् इयं महती सिद्धिः देशस्य विद्यमानां स्वास्थ्य-सेवा-वितरण-प्रणालीं पूरयितुं, विशेषतः ग्रामीण-दूरस्थ-वञ्चित-क्षेत्रेषु असुविधानां निवारणे दूरचिकित्सायाः वर्धमानं महत्त्वं सूचयति। ई-सञ्जीवनी देशस्य अङ्कीय-स्वास्थ्य-पारिस्थितिकी-तन्त्रस्य एकः अनिवार्य-घटकः अथ च प्राथमिक-स्वास्थ्य-संरक्षण-क्षेत्रे विश्वस्य बृहत्तमा दूरचिकित्सा-व्यवस्था च वर्तते।

## रक्षानुबन्धाः

रक्षामन्त्रालयेन भारतीयनौसेनायाः पोतेभ्यः ब्रह्मोस-अग्निनियन्त्रण-प्रणाली तथा प्रक्षेपकयन्त्राणां क्रयणार्थं ब्रह्मोस एरोस्पेस् प्राइवेट् लिमिटेड् इत्यनेन सह षष्ठ्यधिकषड्शत-कोटिरूप्यकाधिक-मूल्यानाम् अनुबन्धः कृतः। अयम् अनुबन्धः 'बाय' इत्यस्याः श्रेण्याः अन्तर्गतं कृतः, यस्य मुख्यं वैशिष्ट्यं भारतदेशे स्वदेशे परिकल्पितस्य, विकसितस्य, निर्मितस्य च उपकरणस्य प्रयोगः अस्ति। नवदिल्ल्यां रक्षासचिवस्य राजेशकुमारसिंहस्य समुपस्थितौ अस्मिन् अनुबन्धे हस्ताक्षराणि जातानि। अस्यां परियोजनायां न्यूनातिन्यूनम् अष्टषष्टिप्रतिशतं भारते निर्मितसामग्री प्रयुज्यते। परियोजना सूक्ष्म-लघु-मध्यमोद्यमान् समेत्य विविधभारतीयोद्योगानां सक्रियसहभागितायाः प्रोत्साहनं करिष्यति।

## विश्व-वित्तकोषः

विश्व-वित्तकोषेण वर्तमान-वित्तवर्षाय भारतस्य जीडीपी इत्यस्य वृद्ध्यनुपातस्य पूर्वानुमानं पूर्व-निर्धारितात् षड्-दशांश-षड्प्रतिशतात् संवर्ध्य सप्त-दशांशैकप्रतिशन्मितं कृतम्। इदं संशोधनम् अपेक्षित-वृद्धेः अपेक्षया अधिक-दृढ-विकासाधारम् अवलम्ब्य कृतम्। विंशति: सप्तविंशति: वित्तीय-वर्षस्य प्रथमे त्रैमासिके सप्त-दशांशाष्टप्रतिशत-वृद्ध्या सह भारतीय-अर्थव्यवस्थायाः अभूतपूर्वः विस्तारः सञ्जातः, यत्र सुदृढ-निज-उपभोगस्य अथ च निवेशस्य प्रमुखं योगदानम् आसीत्।

## ऋतुविभागः

भारतर्तुविज्ञान-विभागेन अद्य केरलम-माहे-दक्षिणान्तरिक-कर्णाटक-तमिलनाडु-पुडुच्चेरी-कराईकल चेत्येतेषां केषुचित् स्थलेषु प्रबलवृष्टेः पूर्वानुमानं कृतम् अस्ति। हरियाणा-चण्डीगढ-दिल्ली-हिमाचलप्रदेश-जम्मू-कश्मीर-लद्दाख चेत्येतेषां पृथक्-पृथक् स्थलेषु अद्य गर्जनेन विद्युत्पातेन च सह प्रबलवातस्य सम्भावना अस्ति।

## क्रिकेटक्रीडा

पुरुष-क्रिकेट्-क्रीडायां भारत-वेस्टइण्डीज-दलयोः मध्ये पञ्च-स्पर्धात्मिकायाः विंशति-प्रति विंशति-अन्ताराष्ट्रिय-प्रतिस्पर्धायाः प्रथमं द्वन्द्वम् अद्य लखनऊ-नगरे सम्पत्स्यते। षड्विंशत्यधिक-द्विसहस्रतमे वर्षे जातासु एशिया-क्रीडासु सुवर्ण-पदक-प्रापणानन्तरम्, एकदिवसीय-श्रृङ्खलायां च द्वि-एकम् इत्यन्तरेण निर्णायक-विजयं प्राप्य, भारतीय-दलं वेस्टइण्डीज-दलं विरुध्य स्वविजय-यात्रां निरन्तरं रक्षितुं प्रयतिष्यते।

**॥ इति वार्ताः ॥**